नं०: १६२-ख-२

नन्दिकेश्वर कारिका
तत्त्वविमर्शिनी टीका
सहिता पत्राणि ६

नन्दिकेश्वरकाशिका
तत्त्वविमर्शिनीटीकासहिता

नं० १६२ ख
पत्राणि ६

नं० १६२ - ख-२
नन्दिकेश्वर काशिका
तत्वविमर्शिनी टीका सहिता
पत्राणि ६

नं·का
१

ॐश्रीगणेशायनमः नमःशिवायदेवायसर्वज्ञायपरात्मने यस्योन्मेषनिमेषाभ्यांव्यक्ताव्यक्तमि
दंजगत् १ श्रीशंगुरुंकुमारंचशैवतत्वविशारदं प्रणम्यनंदिकेशादीन्शिवभक्तान्मुहुर्मुहुः २
श्रीशंकरमितिपाठांतरम् काशिकामादिसूत्राणांनंदिकेशाख्ततांशुभाम् लोकोपकारिणीं टि
कांव्याकरोमियथामति ३ इहखलुसकललोकनायकःपरमेश्वरःपरमशिवःसनकस
नंदसनत्कुमारादीश्रोतृन्नंदिकेशपतंजलिव्याघ्रपादवसिष्ठादींश्चोद्धर्तुकामोढक्कानिना
दव्याजेनचतुर्दशसूत्र्यात्मकंतत्वमुपदिदेश तदनुतेसर्वमुनीन्द्रवर्याश्चिरकालमाश्रिता
नामस्माकंचतुर्दशसूत्र्यात्मकंतत्वमुपदिदेशेतिमत्वाऽस्यसूत्रजालस्यतत्वार्थंनंदिकेश्वर
रोजानातीतिनंदिकेश्वरंप्रणिपत्यपृष्टवन्तस्तेषुपृष्टवत्सुसषड्विंशतिकारिकारूपेणतत्वसू
त्राणामुपदेष्टुमिच्छन्निदमाचचक्षे नृत्तेति अहमितिशेषः नटराजराजइत्यनेनमंग
लादीनिदर्शितानि विश्वरूपविलासवैचित्र्यचमत्कारप्रवीणत्वान्नटराजराजः ।ताण्डवाख्य
रासमात्रविलासवैचित्र्यचमत्कारप्रवीणत्वस्यस्वान्यत्रनटादावपिसत्वात् सत्वात्मतत्व
वागाद्यगोचरइतिज्ञापनायढक्कानिनादव्याजेनसनकादीनुद्धर्तुकामोयन्नवपंचवारंच

१

तुर्दशवारं स्वांतर्गतमात्मतत्त्वं प्रकटयितुं नृत्तावसाने ढक्कां ननाद अहं तदेतद्धि तत्तन्निनादो न
वर्णात्मकमाद्यमतिरहस्यं शिवसूत्रजालं शिवसंबंधिसूत्रसमूहं कात्यायनानूपसूत्रसमूहं वा विम
र्शं विचार्य स्फुटीकरोमीत्यर्थः विमर्श इति छान्दसं बोध्यम् १ अनुबन्धाः पाणिन्याद्युद्दे
शेनाह अत्रेति एष्वित्यादिरर्थः अन्त्यवर्णा इति पाठः । अन्त्यं वर्णोतिवा । उभयथापि वहुव्री

ढक्कां निनादत्यागेन ॥ ॐ नमः शिवाय नृत्तावसाने नटराजराजो ननाद ढक्कां नवपंचवारं स्वांतर्गतमात्मतत्त्वं प्रकटयितुं
उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ॥१॥ विचार्य स्फुटीकरोमीत्यर्थः

हिः कदम्बमन्यपदार्थः समासान्तः । चतुर्दशेति वा पाठः तदा तत्पुरुषः । श्लोकयोरिति चक्र तुर्दशे
तिप्रयोगः केषुचित्पुस्तकेषु अन्त्यवर्णाश्चतुर्दशाकामिति पाठः । धात्वर्थमिति । धातुमूलकश
ब्दशास्त्रप्रवृत्त्यर्थमित्यर्थः । अन्त्यवर्णाजालं सूत्रं इति न्यायेन । तथा चोक्तमिन्द्रेण । अन्त्यव
र्णसमुद्भूता धातवः परिकीर्तिता इति ॥ २ तत्राद्येन सूत्रेण सर्ववर्णानां समस्तभुवनानां च

रूपं

समुद्भवं ब्रह्मात्मतत्त्वमुपदिष्टमित्याह। अकार इति अनेन अः परमेश्वरो निर्गुणः इं मायामाश्रित्य उ व्यापकः सगुणो
नं·का ईश्वर आसीदिति सूत्रार्थः सूचितः। सर्ववस्तुषु परापश्यन्तीमध्यमावैखर्यादिषु इं चित्कलामाश्रित्येत्य गाय
२ त्रीमीं पद्मिनीमिति वदीकारो वाच्यः ततः सूत्रे इकारस्तु त्रिनेत्रेणनोदितः इकारो ग्रीवप्रकटितः। अत्र प्रमाणम
सद्वा इदमग्र आसीत्ततो वै सदजायतेति श्रुतिः। असद् ब्रह्म वै निश्चयेन अग्रे सृष्टेः पूर्वमिदमकारूपात्परात्म
कमासीत्। ततोस्मादसतो वै सगुणमजायत जातमिति तदर्थः। तदुक्तं गीतायां अक्षराणामकारोस्मीति ३

अत्र सर्वत्र सूत्रेषु व्यक्तवर्णचतुर्दशाम्। धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये २
अकारो ब्रह्मरूपः स्यान्निर्गुणः सर्ववस्तुषु। चित्कलामिं समाश्रित्य जगद्रूप उणीश्वरः ३
अकारः सर्ववर्णाग्र्यः प्रकाशः परमेश्वरः। आद्यमन्त्येन संयोगादहमित्येव जायते ४

अत एवाह अकार इति आदिरन्त्येन सहेत्यादिरकारः अन्त्यो हकारः अकारादिहकारान्ताः सर्ववर्णास्ततः परमात्मनः समभवन्नित्यर्थः परमः शिव इति पाठान्तरम् ४ ॐ नमः शिवाय

सर्वमिति ईश्वर एवानादिजीवोपाध्याश्रितकर्मप्रेरितप्राणव्यापारानंतरं नाभौ परा ख्यं मायापरिणाममुपेत्य हृदि पशुंपत्या ख्यमुपेत्य विशुद्धचक्रे मध्यमाख्यमुपेत्य पश्चाद्वक्त्रे वैखर्याख्यमवाप्य वेदादिरूपो भवति ॥ त्यर्थः ॥ श्रुतिरपि वागेव विश्वा भुवनानि जज्ञे इति । सूक्ष्मा वागेव विश्वाकारेण परिणमते विवर्त्तते चेत्य र्थः ॥ अत्यंतरमपि । वचैव विश्वं बहुरूपं निबद्धं तदेतदेकं प्रविभज्योपभुंक्ते इति । अत्र वर्णसंभवकाले अइउ

सर्वंपरात्मकंपूर्णंज्ञप्तिमात्रमिदंजगत् ज्ञप्तेर्बभूवपशुंपंतीमध्यमावाक्ततःस्मृता ५
वक्त्रेविशुद्धचक्राख्येवैखरीमामतालतः सृष्ट्यादिर्भावमाद्यात्ममध्यावाक्समायुतं ६
ज्ञप्त्याविर्भावमात्रात्मामध्यमावाक्समीरितेति पाठांतरम् ॥ ॥ ॥ ॥

ऋलृइति वर्णपंचकमेव सर्वेषामेकोनपंचाशदक्षराणां भूतपंचकानां पंचवर्गाणां च क्रमेण यो निः ॥ तच्च दीर्घह्रस्वभेदाद्विविधम् ६ तत्र सर्वत्रैकारस्यैव स्वतंत्रतामाह अकारमिति जग त्सृष्टुमभूद्धांकार इति च ॥ उक्तं च ॥ स्वप्रकाशपरमात्मवस्तुनो दृश्यमानजगतः सिसृक्षया कामतः परशिवः प्रवेशनं कामवीजमिदमेव निश्चितम् इति वीजविन्दुद्वयात्मकं सार्द्धयोनिस्वरूपकम्

महाकामकलारूपमात्मानं चिंतयेत्प्रिये इति च उक्तमेवं दृढयति अकार इति। उकार इति उव्या
नं·का पकत्वेन ण ईश्वर आसीदित्यर्थः के उ ण श्व इत्यत्रेति भावः ७।८।९।७। ननु सर्ववेदान्तेषु परमे
३ श्वर एक इति निश्चितत्वान्मायामीचित्कलां समाश्रित्य जगद्रूपो भूदित्युक्ते रद्वैतहानिः स्यादि
त्याशंकायामाह ऋत्विगिति तत्राद्यपाठे ऋ परमेश्वरः लमाया व्योमनो वृत्तिं क अदर्शयत्

अकारं सन्निधीकृत्य जगतां कारणत्वतः इकारः सर्ववर्णानां शक्तित्वात्कारणं मतम् ७ जगत्स्रष्टुम
भूदिच्छा यदा ह्यासीत्तदाभवत् कामबीजमिति प्राहुर्मुनयो वेदपारगाः ८ अकारो ज्ञप्तिमात्रं
स्यादिकारश्चित्कलामता उकारो विष्णुरित्याहुर्व्यापकत्वान्महेश्वरः ९ ऋत्विक्सर्वेश्वरोमा
यां मनोवृत्तिमदर्शयत् तामेव वृत्तिमाश्रित्य जगद्रूपमजीजनत् १० ४ ४ ४ ४

तामेवाश्रित्य स्वेच्छया जगज्जनयामासेत्यर्थः पाठान्तरे स तां मनोवृत्तिमाश्रित्येदं चराचरं जनयामा
सेत्यर्थः ऋ परमेश्वर इत्यत्र ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलमिति श्रुतिः प्रमाणम्। ऋतं तत्त्व
दार्थपरं ब्रह्म सत्यामित्यर्थः श्रुत्यंतरमपि। सोऽकामयत बहु स्यां प्रजायेयेति श्रीतन्त्रेऽपि ॥ ॥

३

न४१ यथा

ममचाभून्मनोरूपंऌकारः परमेश्वरीति। ममत्वान्निर्मनोरूपमितिपाठांतरम्। ऌवर्णो यथाना
दात्म्यमापन्नोनथेत्यर्थः। तदाहंभेदलेशाइति वास्तवइत्यर्थः ११ १२ ननुजनयामासेत्युक्तोजन्यज
का३४ नकभावेः द्वैतहानिः स्यादित्याशंकायां तत्सृष्ट्वा तदेवानुप्राविशत्तदनुप्रविष्ट इतिश्रुतिमाश्रित्याह
एऐओऔ मायेश्वरात्मैवेति जन्यजनकत्वंचस्वस्यैव तत्तद्रूपेणविवर्त्तनात् द्वैतहानिः। अकारोकारा त्रा८
ऋऌकर्त्वेर्धोमायाख्यांविस्तारिश्चराचरम् पत्नीमाश्रित्याचिद्रूपोजनयामासकेवलः
इतिपाठांतरम् १० इतितत्त्वमतोऽत्रभेदलेशोनविद्यते चन्द्रचन्द्रिकयोर्यद्वद्यथावाग
र्थयोरपि। वागर्थाविवसुदर्शीतिपाठांतरम् ११ स्वेच्छयास्वस्यचिच्छन्नोविश्वमुन्मी
लयत्यसौ वर्णानांमध्यमंक्लीवमृऌवर्णद्वयंविदुः १२ एऐओऔ मायेश्वरात्मैकाविज्ञा
ऽध्यातिष्पन्नप्रणवरूपेणोंकारेण सगुणनिर्गुणयोरैक्यबोधिते तेनैवदृष्टांतेनसर्वत्रैक्यबुद्धौ द्वैतनिरासो
ध्वनितः समष्टिव्यष्टिभेदेनपूर्ववर्णयुक्तद्वितीयस्यतद्युक्ततृतीयस्यच समन्वयबोधकमिदंसूत्रं
अक्षरात्मकः इमायायुक्तः सन्यः सएव उज्ञानरूपः प्रज्ञानात्मा सर्ववस्तूनामेकत्वादद्वै
तोपपत्तिर्ननानात्वं। जन्यजनकत्वंच स्वयंप्रविश्य तत्तद्रूपेणवर्त्तत इत्यर्थः। वटबीजन्यायेन

ना८

नं० का
४
५

चपूर्वसूत्रद्वयजनितंवर्णपंचकमेवसकलजगत्कारणमितिप्रागुक्तम्। उत्तरसूत्रवर्णानामपि
तस्मादेवसंभवः समष्टिव्यष्टिभेदेषुपूर्ववर्णयुतद्वितीयस्यपूर्ववर्णयुतत्तृतीयस्यचसंयोगजनकमिदं
सूत्रम्। समन्वयबोधनमपि एकत्वेनोक्तम्। अत्राप्यपरत्वे सर्ववेदसंमतंचातथाच सनकदक्षिणा
मूर्त्तिसंवाद महावाक्य विवरणे। शृणुत्व सावधानेनचतुर्णामपिसाम्प्रतं॥ वेदानां चमहाभाग
चतुष्कानामिहोच्यते ब्रह्मप्रोक्तेनयद्वस्तुतत्प्रज्ञानमुदीरितम् प्रज्ञानंब्रह्मयस्माद्धितस्माद्ब्रह्मास्य

साक्षित्वात्सर्वभूतानांसएकइतिनिश्चितम् १३ ऐडोंच ब्रह्मस्वरूपः सन्जगत्सर्वा
न्तर्गतंततः इच्छयाविस्तरंकर्त्तुमाविरासीन्महामुनिः १४

हंततः तद्ब्रह्मसर्वसाक्षित्वा
त्तत्त्वमस्येवतत्त्वतः अन्यत्ववा रणार्थायद्ब्रह्ययमात्मेत्यथर्ववाणीति १३ स्वात्मभूतस्यपरमेश्वरस्यजगत्का
रणत्वंकथमित्याशंकायामाह ऐडोङिति ततःस्वान्तर्गतंजगद्विस्तारयितुमिच्छुः ऐ आदिशक्ति
युतः अक्षरइति अतः पूर्वसूत्रगत अकारएकारदीर्घयोर्योगस्यैव ऐकारत्वमेकात्वंचसंप्रज्ञानस्वरूपपर
मेश्वरोयः सः पूर्वसूत्रगतअकारदीर्घ उकारदीर्घस्यैवयोगे औकारत्वेयः सप्रज्ञानात्ममायाघ्र
बलितः सऔकारोयः सप्राऊ इत्याविर्भावे उक्तं च स्वरविमार्शिन्यां ऊकारज्ञानसंयोगान्त ४

सर्वस्मं मूर्तिरिष्यत इति । इच्छया जगद्विस्तारयितुमुद्युक्त इत्यर्थः । अत्राह । प्रणवेन जगद्व्याप्तं मा
यायामवतिष्ठत इति ज्ञानोत्तमे । एवं तत्त्वसमुदायानां त्रयोदशवर्णाच्छिवादिप्रकृत्यन्तानामु
द्भवः प्रकृतिपुरुषविवेक उक्तः चक्रपर्यायेऽस्मिन्सूत्रे उपसंहारत्वेन पठ्यते । अं ह्रस्वदीर्घप्रभे
दाच्चतुर्दशस्वराणामेषं संकीर्तनं । चतुर्दशभुवनं चतुर्दशचक्रं चतुर्दशप्रकाराणामिति निष्कर्षः
तदुक्तं शिवगौरीसंवादे महामंत्रतत्त्वप्रकाशिन्यां । तत्त्वमंत्रं महेशानि ममरूपं त्वमेव हि । चतुर्दशा
त्मकं चक्रं तव चक्रमितीरितम् त्रयोदशात्मकं तुर्यमावयोर्मंत्रमंविके ॥ उक्तं च कालेवि

भूतपंचकमेतस्माद्रूपवर्णमहेश्वरात् व्योमवाय्वम्बुवह्न्याख्यभूतान्यासीत्स एव हि १५

विंद्वात्मा तस्माद्धसंभवः विंदुस्फोटनमात्रेण वर्णानां च समुद्भवः तस्मादाकाशमुख्यानि भूता
नि समजायन्त विंदुः श्रीचक्रराजस्य परब्रह्मात्मकत्वमिति चतुर्दशात्मकं पश्चाच्चक्राकारेण संभ
वः उत्पन्नभुवनान्यत्र चतुर्दशा चतुर्दशेति १४ तत आत्मनः सकाशादाकाशादिभूतसंभवमा
ह भूतेति स एव परमेश्वर एव हकारादिति तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः आ
काशाद्वायुर्वायोरग्निरग्नेरापः इति श्रुतेरितस्मात्परमेश्वराद्भूतपंचकमाकाशादिकं प्र

नै·का
५

पंचकारणमासीत् अत्रास्मिन्सूत्रे भूतपंचकमासीदित्युक्तं नत्वाकाशादिभूतचतुष्टयमेवोक्तं न
पृथिवीत्याकांक्षायां यदाधारस्वरूपं समस्तकारणमिति सूत्रांतरेणावोचत् आधार इति भूता
नां प्राणिजातानामुद्भिज्जस्वेदजजरायुजांडजादीनां प्रधानकारणत्वादाधारभूतं पृथिवीपु
नरन्नपानादीनां कारणम्। अन्नाद्भूतनुतिन्वर्यात् एतेषां कारणत्वात्स्वत्यकत्वेन लाणित्युदीरित
मित्यर्थः १७ ततः पृथिव्यादीनां तन्मात्राणामुत्पत्तिक्रममाह शब्दस्पर्शाविति व्योमादीनां गु

हकाराद्व्योमसंज्ञश्च यकाराद्वायुरुच्यते रकाराद्वह्निस्तोयं तु वकारादिति शैववाक् १६
आधारभूतं भूतानामन्नादीनां च कारणम् अन्नाद्भूतस्ततो जीवः कारणत्वाज्जगदीरितम् १७
शब्दस्पर्शो हि रूपरसगन्धाश्च क्रमशः गुणनम् व्योमादीनां गुणा ह्येते ज्ञानीयात्सर्ववस्तुषु १८

णानेकैककारणानेनानुजानीयात् सर्ववस्तुष्विति अत्रकेषांचिद्भूत्ये अकारादिक्षकारांताः
षट्त्रिंशत्तत्त्वमयाः कतिचित्तंत्रराजादिग्रन्थे पंचपंचक्रमेण भूतलिपिक्रमेण भूतलिपिप्रका
रेण एवमन्यत्र बीजनिसर्गभेदा बहवः संति अत्र तु तत्रोक्तप्रकारेण घटितम् पंचव
र्गेषु त्रिमावर्णाः शब्दस्पर्शादयो गुणा इति वचनात् सर्वजगत्कारणभूतस्य वर्णात्मपपुरुषस्य

ततः सूत्राभ्यांकर्मेन्द्रियवर्गमुद्घाटयति वाक्याणीति चिद्रूपशिवस्यप्राणिजातस्यच ऊकारभकारौ
स्थावरादिषुविनाविराड्रूपंविज्ञेयमित्यर्थः अथक्रमप्राप्तंपादादिकमाह घढधषेति परमार्थतः
परमशिवसकायाद्यादिमेकर्मेन्द्रियगणाः सर्वजन्तूनांपादपायूपस्था घढधवर्णाजाता इत्यर्थः २०
क्रमप्राप्तंज्ञानेन्द्रियसंभवमाह श्रोत्रेति वर्गाणांमध्यवर्णाः श्रोत्राज्ञानेन्द्रियगणः स्मृतइतिवचनशः श्रो

वाक्याणीचऊभन्नासीद्विराड्रूपंचिदात्मनः सर्वजन्तुषुविज्ञेयंस्थावरादौनविद्यते १९
वर्गाणांतुर्यवर्णायेकर्मेन्द्रियपदाहिते घढधषसर्वभूतानांपादपायूउपस्थकः २० कर्मे
न्द्रियगणाह्येतेजाताहिपरमार्थतः परमात्मनः वा इतिपाठान्तरम् २० श्रोत्रत्वङ्
यंघ्राणजिह्वाधीन्द्रियपंचकम् सर्वेषामपिजन्तूनामीरितंञवगडरूप ॥२१॥

स्नाञवगडदवर्णासंभवोज्ञानेन्द्रियगणइति सर्वत्रसर्वेषांप्राणिजातानामेतेवर्णाज्ञानेन्द्रिया
णांजनकाइतिवाविज्ञेयमित्यर्थः ततःप्राणादिपंचकमनोबुद्ध्यहंकाराःसमुन्मीलयन्ते
प्राणादीति । एतेरष्टवर्णैः प्राणादिपंचमनोबुद्ध्यहंकृतंञ्चडगनांकारणत्वेनसंभूताइत्यर्थः
ततः सर्वप्राणिकारणत्वेनाद्यन्तवर्गद्वयाद्धरग्रहणत्वेनसंपुटीभावप्रेक्षेतिपुरुषाभ्याम्

गः

नंका
६

गुरुः

काप्याययति ककारपकारजातौ प्रकृतिपुरुषावित्यर्थः २४ ततो वस्यात्रयं निरूपयति सत्वमिति पु
रासृष्टेः प्राक् शषसवर्णाः भूतानि सत्वरजस्तमोगुणानाश्रित्य परमाशिवः सर्वभूतेषु क्रीडतीत्यर्थः
शकारादिति स्पष्टम् सर्वतत्वजनकः स्वयं तत्वातीत इति ज्ञापनार्थमेतत्सूत्रं चकारेत्याह तत्वाती

प्राणादिपंचकंचैव मनोबुद्धिरहंकृतिः बभूव करणत्वेन बफभवघधचटतव २२ वर्गद्वितीयव
र्णोत्थाः प्राणाद्याः पंचवायवः मध्यवर्गत्रयाज्जाताअंतःकरणवृत्तयः २३ अंत्यद्वयसमुद्भूतो
पुरुषः प्रकृतिर्गुणः प्रकृतिपुरुषंचैव सर्वेषामेव संमतम् संभूतमिति विज्ञेयं यकपाभ्यामिति नि
श्चितम् इति पाठांतरम् २४ सत्वंरजस्तम इति गुणानां त्रितयं पुरा समाश्रित्य महादेवः श्री
षसैः क्रीडति प्रभुः २५ शकाराद्राजसं रूपं षकारात्तामसोद्भवः सकारात्सत्व संभूति
रिति त्रिगुणसंभवः २६ तत्वातीतः परः साक्षी सर्वानुग्रहविग्रहः अहमात्मा परो
हल्स्यादिति शंभुस्तिरोदधे २७ इतिश्रीनंदिकेश्वरकृतकाशिकासंपूर्णा शिवम्

त इति सर्वानुग्रहः साक्षी तत्वातीतो हल्स्यादिति ढक्कानिनादव्याजेन सर्वेषां मुनिजनानां
तत्वमुपदिश्य शंभुस्तिरोदधे इत्यर्थः हकारः शिववर्णः स्यादिति शैवागमस्थितिरितिशिवम् इति
ति

६